International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 51-55
© 2026 IJMH
www.themultijournal.com
Received: 26-06-2026
Accepted: 15-07-2026
Publish : 17-07-2026

**हरीश कुमार**
शोधार्थी,
सोबन सिंह जीना विश्वविद्यालय,
अल्मोड़ा,पं. बी.डी. पाण्डे परिसर,
बागेश्वर, (उत्तराखण्ड)

**शोध निर्देशक**
**डॉ. उमेश चन्द्र जोशी**
असिस्टेंट प्रोफेसर संस्कृत,
राजकीय महाविद्यालय नानकमता,
उधम सिंह नगर,(उत्तराखण्ड)

**Correspondence:**
**हरीश कुमार**
शोधार्थी,
सोबन सिंह जीना विश्वविद्यालय,
अल्मोड़ा,पं. बी.डी. पाण्डे परिसर,
बागेश्वर, (उत्तराखण्ड)

# आधुनिक ज्ञानपरम्परायां वेदानां धार्मिक, सांस्कृतिक, आर्थिक महत्त्वम्

**हरीश कुमार , डॉ. उमेश चन्द्र जोशी**

**शोध सारांशः**

विद् ज्ञाने इति ज्ञानार्थकाद् विद्धातोर्घञि प्रत्यये कृते वेद इति रूपं निष्पन्नं भवति। एवं वेद शब्दः ज्ञानार्थकः अस्ति। एवमेव ज्ञानराशिर्वेदः वयं इति वक्तुं शक्यते। विद् सत्तायाम्, विद विचारणे, विद्लृ लाभे, विद् चेतनाख्याननिवासेषु इति धातुभ्योऽपि घञि वेदरूपं निष्पन्नं भवति। वेदार्थान्वेषणाद् ज्ञायते यत वेदाः हि विविध ज्ञानविज्ञान राशयः, संस्कृतेराधाररूपाः कर्तव्याकर्तव्य अवबोधकाः, शुभाशुभनिदर्शकाः, जीवनस्योन्नायकाः, विश्वहितसम्पादकाः, आचार-संचारकाः, सुखशान्तिसाधकाः, ज्ञानालोकप्रसारकाः, सत्यतायाः सरणयः, कलाकलापप्रेरकाः, आशायाः आश्रयाः, नैराश्यविनाशकाः, चतुर्वर्गावाप्तिसोपान स्वरूपाश्च सन्ति।

वेदानां महत्त्वविचारचिन्तायां कतिपयेऽनुयोगाः पुरतोऽवतिष्ठन्ते। कति वेदाः ? किं वेदानां महत्त्वम् ? किं च तत्र विशिष्टं ज्ञानम् इति। किं तेषां व्यावहारिकी उपयोगिता ? कि वेदाध्ययनस्यजीवने उपयोगित्वम् किं च समस्याबहुले जगति समस्यानिराकरणत्वं वेदानाम् ? किं च वेदानां धार्मिकं राजनीतिकम्, आर्थिकं, वैज्ञानिकम्, ऐतिहासिकम्, काव्यशास्त्रीयम्, शास्त्रीयम्, सामाजिकम्, सांस्कृतिकं च महत्त्वम्? इति एव अत्र समासतो विव्रियते प्रस्तूयते च।

**प्रस्तावना**

मुख्यत्वेन वेद शब्दः ऋग्यजुःसामाथर्वनामभिः प्रचलितानां चतसृणां वेदसंहितां बोधकः। एतेषामेव चतुर्णां वेदानां व्याख्यानभूता ब्राह्मणग्रन्थाः सन्ति, येषु वैदिककर्मकाण्डस्य विशदं वर्णनमस्ति। एतेषु वेदानाम् आध्यात्मिकी व्याख्याऽपि प्रस्तूयते। एतेषां परिशिष्ट रूपेण आरण्यकग्रन्थाः सन्ति। एषु आध्यात्मविद्याया विवेचनं प्राप्यते। उपनिषत्सु च तस्या एवाध्यात्मविद्यायाश्चरमोत्कर्षः संलक्ष्यते। वैदिकसाहित्यशब्देन समग्रोऽपि मन्त्रब्राह्मण- आरण्यक-उपनिषद् संग्रहरूपो निधिर्गृह्यते। अतएव **'मन्त्रब्राह्मणयोर्वेदनामधेयम्'**।[1] इति निर्दिश्यते।

**कूट शब्दाः- ऋग्वेदः, धार्मिकं महत्त्वम्, संस्कृतभाषा, ब्राह्मणसाहित्यं, आरण्यकानि, उपनिषदः, वेदाङ्गनानि, दर्शनानि, रामायण, महाभारत, धनोपार्जनम्, उदारता, दया, सत्यभाषणं, सत्सङ्गमः सुपथगमनं, पवित्रता।**

**वेदानां धार्मिकं महत्त्वम्**

वेदा मान्वादिभिः ऋषिभिः परमप्रमाणत्वेनोपन्यस्ताः **'वेदोऽखिलो धर्ममूलम्'**।[2] इति समुद्घोषयता मनुना समग्रस्यापि वेदनिधेर्धर्माधाररूपेण प्रतिष्ठा विहिता। मानवस्याखिलं कृत्यजातं कर्तव्याकर्तव्यं च वेदेषु विशदतया निरूप्यते। अतएव वेदा आचारसंहिता-रूपेण प्रमाणीक्रियन्ते।

**यः कश्चित् कस्यचित् धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।** [3]

सर्वेऽपि विद्वत्तजनाः, भारतीय दार्शनिकाः, आचारशिक्षणप्रवणाः, स्मृतिकाराः, शब्दतत्वमिमांसादक्षाः, वैयाकरणाः, अन्य च शास्त्रकाराः वेदानां परमप्रामाण्यं प्रतिपदम् उद्घोषयन्ति। अतएव महर्षिपतंजलिना कर्तव्यत्वेन समादिश्यते यत-ब्राह्मणेन निष्कारणो **'धर्मः षडङ्गो वेदोऽध्ययो ज्ञेयश्च'**।[4]

वेदाः भारतीयसंस्कृतेः प्राचीनतमाः, पवित्रतमाः च ग्रन्थाः सन्ति। ते केवलं धार्मिकग्रन्थाः न, अपितु सम्पूर्णमानवजीवनस्य मार्गदर्शकाः सन्ति। भारतीयधर्मस्य मूलाधाररूपेण वेदानां स्थानम् अद्वितीयम् अस्ति। धर्मस्य तत्त्वं, ईश्वरस्य स्वरूपम्, यज्ञस्य महत्त्वम्, ऋतस्य पालनम्, नैतिकमूल्यानि, मोक्षमार्गश्च वेदेषु सम्यगुपदिष्टाः सन्ति। अतः वेदानां धार्मिकमहत्त्वं सार्वकालिकं सार्वभौमिकं च मन्यते।

धर्मशास्त्रेषु प्रसिद्धं वचनम् अस्ति— **"वेदोऽखिलो धर्ममूलम्।"** अर्थात् समग्रः धर्मः वेदेष्वेव प्रतिष्ठितः अस्ति। मनुष्यस्य कर्तव्याकर्तव्यनिर्णयः, सामाजिकव्यवस्था, संस्काराः, यज्ञाः, उपासनाविधयः, नैतिकजीवनस्य सिद्धान्ताश्च वेदाधारिताः एव सन्ति। वेदेषु प्रतिपादिताः यज्ञाः न केवलं देवपूजनस्य साधनानि, अपितु लोककल्याणस्य, पर्यावरणसंरक्षणस्य, सामाजिकसमन्वयस्य च माध्यमानि सन्ति। ऋग्वेदे, यजुर्वेदे, सामवेदे, अथर्ववेदे च विविधाः मन्त्राः ईश्वरभक्तिं, सत्यपालनं, दानशीलतां, अहिंसां, करुणां, सहिष्णुतां च प्रेरयन्ति। एते गुणाः धार्मिकजीवनस्य आधारभूततत्त्वानि सन्ति।

वेदेषु धर्मः केवलं कर्मकाण्डपर्यन्तः न सीमितः। अपितु सत्यं, ऋतम्, तपः, ब्रह्मचर्यम्, स्वाध्यायः, सेवा, आत्मसंयमः, विश्वबन्धुत्वं च धार्मिकजीवनस्य आवश्यकाङ्गानि इति प्रतिपाद्यन्ते। उपनिषदां माध्यमेन वेदाः जीवात्मनः परमात्मनश्च ऐक्यस्य अनुभूतिं मोक्षस्य परमलक्ष्यत्वेन निरूपयन्ति। भारतीयजीवनस्य षोडशसंस्काराः—गर्भाधानात् अन्त्येष्टिपर्यन्तम्—वेदमन्त्रैरेव सम्पन्नाः भवन्ति। विवाहः, यज्ञोपवीतसंस्कारः, नामकरणम्, गृहप्रवेशः, अन्त्येष्टिः इत्यादयः सर्वे धार्मिकसंस्काराः वेदाधारिताः सन्ति। अतः वेदाः केवलं धार्मिकग्रन्थाः न, अपि तु भारतीयजीवनस्य आध्यात्मिक-सांस्कृतिक-नैतिकपरम्परायाः आधारस्तम्भाः सन्ति।

अद्यतनकालेऽपि वेदानां धार्मिकप्रासङ्गिकता अविच्छिन्ना वर्तते। विश्वशान्तिः, पर्यावरणसंरक्षणम्, मानवैक्यम्, नैतिकमूल्यसंरक्षणं च वेदेषु प्रतिपादितैः सिद्धान्तैः सुदृढं भवितुमर्हति। अतः वेदानां धार्मिकमहत्त्वं केवलं प्राचीनभारते एव न, अपितु सम्पूर्णमानवसमाजस्य कल्याणाय अद्यापि अत्यन्तमुपयोगि अस्ति।

निष्कर्षतः वक्तुं शक्यते यत् वेदाः भारतीयधर्मस्य प्राणाः सन्ति। तेषु प्रतिपादिताः धार्मिकसिद्धान्ताः मनुष्यं सदाचारे, आत्मोन्नतौ, लोकहिते च प्रवर्तयन्ति। धर्मस्य मूलस्वरूपं, आध्यात्मिकचिन्तनं, यज्ञपरम्परा, संस्कारव्यवस्था, मोक्षमार्गश्च वेदैरेव प्रकाशिताः। अतः वेदानां धार्मिकमहत्त्वं न केवलं ऐतिहासिकम्, अपितु शाश्वतं, सार्वकालिकं, विश्वमानवकल्याणप्रदं च अस्ति

## वेदानां सांस्कृतिकं महत्त्वम्

भारतीयायाः संस्कृतेर्मूलस्रोतोऽनुसंधीयते चेत तर्हि वेदा एव तन्मूलस्रोतस्त्वेनोपतिष्ठन्ति। वेदेषु एव भारतीया संस्कृतिर्वर्णिताऽस्ति। भारतीयायाः संस्कृतेर्मूलरूपं वेदेषु एव उपलभ्यते। वेदेषु एव प्राक्तनभारतीयानां जीवनदर्शनं, कार्यकलापः, आचार विचाराः, नैतिक-सामाजिकम् च चरितं प्राप्यते। मानवानां विविधकर्त्तव्यादि-निर्धारणं तत्रैवोपलभ्यते। उक्तं च मनुना-तद्यथा

**सर्वेषां तु स नामानि कर्माणि च पृथक पृथक।**
**वेद शब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।।**[5]

भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा-अस्याभिप्रायोऽयं वर्तते यत् संस्कृतभाषा भारतीयसमाजस्य आधारः। इयं भाषा विश्वस्य श्रेष्ठतमा भाषा इति। अस्याः भाषायाः सुविशालं वैदिकं लौकिकश्च साहित्यं विलोक्य सर्वे विस्मिताः भवन्ति। चत्वारो वेदाः, ब्राह्मणसाहित्यं, आरण्यकानि, उपनिषदः, वेदाङ्गनानि, दर्शनानि, रामायण, महाभारत, तथा च महाकविभासकालिदास-भारवि-श्रीहर्षमाघ-भवभूति-बाणभट्ट-सुबन्धुप्रभृतिभिः स्वनामधन्यैः महाकविभिः विरचितानि महनीयानि, रमणीयानि, नाटक-महाकाव्य गीतिकाव्यादीनि पठित्वा कस्य सचेतसः हर्षातिरेको न जायते? यद्यपि भाषेयं भारतदेशस्य अलंकारभूताः परन्तु अस्यां भाषायां येषां विचारणां चिन्तनानां वा समावेशोऽस्ति न तादृशः अन्यत्र दृश्यते। ऋग्वेदे कथितमस्ति यत्-

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम।**
**देवा भागं यथा पूर्वे सञ्जानाना उपासते।।**[6]
**समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।**
**समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि।।**[7]

अर्थात समानं गमनं, समानं वचनं, समानं मनः, समानो मन्त्रः, समानं चित्तमपि स्यादिति उद्घोषितं वैदिकऋषिणा। अतः अस्माभि सर्वैः सह समानव्यवहारः व्यवहर्तव्यः, तथा समानं प्रयोजनं, समानं हृदयं च भूयात् समेषाम् इति वैदिकपरम्परायाः चिन्तनम्।

**समानी व आकूतिः समाना हृदयानि वः।**
**समानस्तु वो मनो यथा वः सुसहासति।।**[8]

वैदिकसाहित्यस्य गुणकीर्त्तनं गौरवाय प्रकल्प्यते। वेदस्य ज्ञानं भारतस्याभिमानवर्धकम् इत्यत्र सन्देहो नास्ति। ऋग्वेदस्य दशमम-ण्डलस्य चतुस्त्रिंशत्तमे सूक्ते अक्षक्रीडां परित्यज्य कृषिं कर्तुं मानवः प्रबोध्यते। तद्यथा-

**अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः।**
**तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः।।**[9]

प्रभृतिषु द्यूतक्रीडाषु स्वधनं नाशयन्ति कुटम्भं च दुःखीकुर्वन्ति। **अक्षैर्मा दीव्यः**-इत्यस्य वैदिक ज्ञानस्यानुपालनं साम्प्रतिकसमाजाय शिक्षयति। एकस्मिन् स्थाने ऋग्वेदे प्राप्यते-**'भद्रं मनः कृणुष्व वृत्रतूर्ये:'**।[10] अतः मनः यदि स्वच्छं निर्मलं च स्यात् तर्हि मनोविकाराः मानवं प्रभावयितुं न समर्थाः भवन्ति। वस्तुतः उत्तममनोयुक्ताः मानवाः सततमेव प्रगतिमाप्नुवन्तीति।[11] एवं स्वस्थशरीरनिर्माणाय स्वस्थमनसः आवश्यकता वर्तते। अधुना मानसिकरोगाः सर्वत्र परिलक्ष्यन्ते। समाजे मनोरोगिणां संख्याः उत्तरोत्तरं वर्धमाना दृश्यते। इयं महति समस्या अस्माकं सर्वेषां पुरतः

दृश्यमानाः अस्ति। एतस्याः समस्यायाः एकमात्रोपायः केवलं वेदेष्वेव निहितोऽस्ति।

वयं मानवाः इतरैः सह जीवामः, कार्यं कुर्मश्च। अतः सुविचाराणाम् अस्माकं जीवने महती आवश्यकता वर्तते । वेदेषु अनेकानि एतादृशानि विचाराणि सन्ति, येषां पालनेन समाजस्य कल्याणं सम्भवति एव। वेदा न केवलं ज्ञानविज्ञानराशयोऽपि तु समाजस्य अनुशासका धर्मग्रन्थाः वर्तन्ते। तेषां सन्देशः शाश्वतो, न तु युगविशेषानुरोधि। वेदा मानवसंस्कृतेः सभ्यतायाश्चादिस्रोतः। अत्र मनुष्याणां निरायताविषयकं स्वास्थ्यविषकश्च महच्चिन्तनं प्रत्यक्षीभवति। वेदे कथितमस्ति यत् भद्रस्याकांक्षीपुरूषः न केवलं मानवं प्रति अपितु इतरप्राणिनं प्रत्यपि शुभदृष्टिं निक्षिपेत्।

**भद्रं वैवरं वृणते भद्र युंजन्ति दक्षिणम।**
**भद्र वैवश्वते चक्षुर्बहुत्रा जीवतो मनः।।**[12]

इयं भावन विद्यते वेदेषु। धर्मार्थकाममोक्षस्य चतुर्विधपुरूषार्थसाधनेनैन जीवनलक्ष्यं पूर्णं भवति। एतत् पुरूषार्थसाधनाय वैदिकसाहित्यमनवरतमुपयुज्यते। संक्षेपेण विश्वकल्याणाय विश्वप्रेमपरिवर्धनं, कर्त्तव्यनिर्वहणस्त्रीणामादरं, न्यायमार्गेण धनोपार्जनम्, उदारता, दया, सत्यभाषणं, सत्सङ्गमः सुपथगमनं, पवित्रता, सदाच-रणमित्याद्यंशा सर्वदोषयुक्ताः, भवन्तीति एतादृशानि बीजानि वेदेष्वनेकक्षेत्रोपलभ्यन्ते।

अतः मानवतां स्थापयितुं वेदेषु अनेकाः उपदेशाः विद्यन्ते। वैदिकऋषयः विश्वस्य शान्तिकामनया उच्चरितवन्तः- **'द्यौः शान्तिरिक्षं शान्तिः, पुथिवी शान्तिः, आपः शान्तिः, औषधयः शान्तिः, विश्वदेवाः शान्तिः, ब्रह्म शान्तिः, सर्व शान्तिः, शान्तिरेव शान्ति, सा मा शान्तिरेधि। अस्यां स्थित्याम् अन्तरिक्षं शान्तिः, पृथिवीः शान्तिः, वनस्पतयः शान्तिः'**[13] इति अस्माकमतीवाश्यकम् वर्तते। विश्वेस्मिन् सर्वत्र अशान्तेः वातावरणं दरीदृश्यते। सर्वत्रैव शान्तिसम्मेलनं, शान्तिवार्ता, शान्तिसंघस्य निर्माणं, शान्तिनिकेतं, शान्त्यर्थमुपासना चेत्यादि श्रूयते, पठ्यते च। अस्माकं सर्वेषाम् इदं परं प्रयोजनमस्ति यत् केन उपायेन भूमण्डले शान्तिः संस्थापिता स्यात्।

आचारहीनं न पुनन्ति वेदाः' इत्यादि वचनात् सिद्धयति यत् आचारस्यापि शुद्धता विषयेऽपिऋषिभिः योगदानं दत्तम्। यजुर्वेदेऽपि चरित्रशुद्धये मन्त्रः अस्ति- **'वाचते शुन्धामि, प्राणं ते शुन्धामि, चक्षुस्ते शुन्धामि, श्रोत्रं ते शुन्धामि, नाभिं ते शुन्धामि, चरित्तास्ते शुन्धामि'**।[14] श्रेष्ठतायाः हेतु चरित्रमेवाऽसीत् स्वीकृतम।

वैदिकवांङ्गमये प्रत्यक्ष एवं परोक्षरूपेण च चारित्र्यविकासाय अनेके सन्दर्भाः प्राप्यन्ते। शिष्यस्य गुरूणा सह व्यवहारः, गुरोः शिष्येण सह व्यवहारः, पितुःपुत्रेण सह व्यवहारः, पितासह पुत्रस्य व्यवहारः, पति-पत्न्यौ विधो व्यवहारः, निदर्शितो अस्ति। रामायणादिकाव्यानामपि उदेश्यं रामादिवद्वयवहर्त्तव्यं न रावणादिवदिति। तपः पूताः ऋषयः स्वचरित्रेणैव मानवान् शिक्षितवन्तः।

**एतदेशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पुथिव्यां सर्वमानवः।।**[15]

अथर्ववेदानुसारं शिक्षायाः उद्देश्यमस्ति यत् बुद्धेः विकासः, बौद्धिकं तीक्ष्णताप्रदानम्, परिष्करणम्, उन्नतिम्, तथा च महान् सौभाग्यस्य प्राप्तिः मन्त्रऽस्मिन् वर्णितम्-**'वर्धयैनं ज्योतयैनंम हते सौभगाय। संशितं चित् संतरं सं शिशाधि।'**[16] शिक्षायाः सफलता तदैव भवति, यदा कर्मणि कर्मठता भवेत्। प्रगतिशीलकर्मठ, सतत् संघर्षशील मानवस्य निर्माणमपि वैदिक शिक्षायाः परमोद्देश्यम् मन्त्रे आयाति **'अपनस्वती मम धीरस्तु शक्र'** ।[17] अर्थात मह बुद्धिः सदा कर्मठा भवेत्। देवतापि पुरूषार्थी पुरूषं इच्छन्ति न तु अकर्मण्यपुरूषं। **'इच्छति देवाः सुन्वन्तम्'**।[18] यजुर्वेदे अपि स्पष्ट रूपेण उक्तं यत् ज्ञानस्य कर्मस्य च समन्वयः अभीष्टमस्ति। यत कर्मभार्गात् जीवन निर्वाहः, ज्ञानयार्गात् मोक्षं प्राप्नोति पुरूषः।–**'अविद्यया मृत्युं तीर्त्वा, विद्यायाऽमृतमश्रुते'**।[19]

एतस्य विचारस्य यथार्थता सम्प्रति अस्ति न वा ? इति विषये विचारयामः चेत् अस्माकम् नगरीषु यन्त्रोत्पादननिर्गतैर्धूमैः वायुर्दूषितः, जलं दूषितं। अरण्यानाम उच्छेदनात् वृष्टिर्न भवति। मृत्तिकायाः दुरतमवक्षयो जायते। अस्मिन् संसारे जीवनसंरक्षायै एव जडचेतनाः जीवाः जलमभिलषन्ति। जलं विना तेषां जीवनं सुरक्षितं न तिष्ठति। अतः वेदे प्राथ्यर्ते-**'शन्नो देवीरभिष्टय आपो भवन्तु पीतये। संयोरभिवन्तु नः'**।[20]

वेदेषु राष्ट्रपरिकल्पनायाः राष्ट्ररक्षायाः राष्ट्रभ्युदयोपायस्य राष्ट्रियसंवर्धनादिसम्बन्धित विभिन्नसन्दर्भाणाञ्च विस्तृता चर्चा मिलति। राष्ट्रस्य समग्रसमृद्धयर्थ कामना एवमभिव्यक्ता।

**आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायता मा राष्ट्रे राजन्यः।**
**शूर इषव्योऽतिव्याधी महारथो जायताम्।।**[21]

विश्वकल्याणाय लोकोपकारकोऽयं मन्त्रः समाजस्य विकासाय आधारभूतं तत्त्वं भवति। शिक्षा यथा समाजस्य शिक्षाव्यवस्था भवति तथैव समाजः अपि भवति। पुरा यद्यपि शिक्षाया उद्देश्यमासीत्-**'सा शिक्षा या विमुक्तये'** तथापि पुरूषार्थचतुष्टयमध्ये धर्मार्थकाममोक्षाः परिगणिता आसन्। येन **'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृमश्रुते'** अर्थात वेदादिशास्त्राध्यनेन सांसारिकसमृद्धिं प्राप्य नियमेन जीवनमुक्तिं प्राप्स्याति तथा व्यवस्थासीत्। अतः शिक्षायाः प्रभावः न केवलमस्मिन जन्मनि, अपितु परलोकेऽपि आसीत्। शिक्षा मानवजीवनं सरलीकरोति परन्तु इदानीं भौतिकीसमृद्धि एव स्वीकुर्वन्ति। येन कारणेन हिंसा, अनाचारः, शठतादीनां दुर्गुणानामेव विकासो जायते। अतः वर्तमानशिक्षाव्यवस्थायामावश्यकपरिवर्तनं भवेत् इति अस्माभिः प्रयासः करणीयः।

**वेदानां आर्थिक महत्त्वम्**

वेदाः भारतीयसंस्कृतेः प्राचीनतमाः ज्ञाननिधयः सन्ति। ते केवलं धार्मिक-आध्यात्मिकविषयाणामेव प्रतिपादकाः न, अपितु सामाजिक-आर्थिक-राजनीतिकजीवनस्यापि मार्गदर्शकाः सन्ति। वैदिक-दृष्ट्या धर्मस्य आधारेण अर्थस्य सम्पादनम् आदर्शः परिगण्यते। अर्थः पुरुषार्थचतुष्टयस्य द्वितीयः पुरुषार्थः अस्ति, तस्य सम्यक् प्राप्त्या व्यक्तेः, समाजस्य, राष्ट्रस्य च समृद्धिः सम्भवति। वेदेषु कृषिकर्मणः विशेषः महिमा वर्णितः। अन्नम् जीवनस्य मूलाधारः इति मन्यते। कृषेः उन्नत्या राष्ट्रस्य आर्थिकसमृद्धिः वर्धते। भूमिः माता इव पूज्या, कृषकः समाजस्य पोषकः इति वैदिकदृष्टिः अस्ति।

अतः कृषेः संवर्धनं वेदेषु सर्वथा प्रशस्तम्। वैदिककाले गोसम्पदः आर्थिकसमृद्धेः प्रमुखः आधारः आसीत्। गावः दुग्धप्रदाः, कृषिकर्मणि सहायिकाः तथा धनस्य प्रतीकाः आसन्। गोपालनस्य विकासेन ग्राम्यजीवनं स्वावलम्बि भवति तथा राष्ट्रस्य अर्थव्यवस्था दृढा भवति। वेदेषु वाणिज्यस्य, नौकायानस्य, शिल्पकर्मणः तथा विविधोद्योगानां उल्लेखः दृश्यते। व्यापारः सत्येन, न्यायेन, विश्वसनीयतया च कर्तव्यः इति वैदिकोपदेशः अस्ति। उद्योगशीलता, परिश्रमः तथा कर्मनिष्ठा आर्थिकविकासस्य प्रमुखकारणानि भवन्ति। वेदाः धनार्जनस्य अनुमोदनं कुर्वन्ति, किन्तु अन्यायेन, छलपूर्वकं वा धनप्राप्तिं न स्वीकुर्वन्ति। धर्मसम्मतमार्गेण अर्जितं धनं दाने, शिक्षायाम्, अतिथिसत्कारे, यज्ञकर्मणि तथा लोककल्याणे विनियो-जनीयम्। एवं धनस्य सामाजिकोपयोगिता प्रतिपादिता अस्ति। प्रकृतिसंरक्षणम् आर्थिकविकासश्च वेदेषु जलस्य, वनानां, भूमेः, पशूनां च संरक्षणं विशेषरूपेण प्रतिपादितम्। प्राकृतिकसम्पदां संरक्षणेन एव दीर्घकालिकः आर्थिकविकासः सम्भवति। एषा वैदिकी भावना आधुनिकस्य सततविकाससिद्धान्तस्य आधारभूता दृश्यते।

भारतीयदर्शनपरम्परायां धर्मः, अर्थः, कामः, मोक्षः इति पुरुषार्थ-चतुष्टयं मानवजीवनस्य परमलक्ष्यरूपेण स्वीकृतम्। तेषु अर्थः मानवजीवनस्य सामाजिक-आर्थिक-व्यवस्थायाः मूलाधारः मन्यते। अर्थस्य अभावे न धर्मपालनं, न कामस्य पूरणं, न च मोक्षसाधनं सम्यग् सम्भवति। अतः वैदिकवाङ्मये अर्थः केवलं धनसम्पत्तेः पर्यायः न, अपितु जीवनोपयोगिनां सर्वेषां साधनानां, संसाधनानां, उत्पा-दनस्य, वितरणस्य, संरक्षणस्य च समष्टिरूपेण विवक्षितः।

वेदेषु अर्थ शब्दः व्यापकभावेन प्रयुक्तः। तस्य तात्पर्यं धनसम्पा-दनमात्रे नास्ति, अपितु कृषिः, पशुपालनम्, वाणिज्यम्, उद्योगः, अन्नसमृद्धिः, गोसम्पदः, जलसंरक्षणम्, प्राकृतिकसम्पदां समुचितो-पयोगः, लोककल्याणश्च इत्यादिषु अपि अन्तर्भवति।

अतः वैदिकदृष्ट्या अर्थः धर्माधारितः, न्यायसम्मतः, लोकहित-प्रधानश्च अस्ति। ऋग्वेदे धनं परिश्रमेण, सत्येन, धर्मेण च सम्पाद-नीयम् इति प्रतिपादितम्। अन्यायेन प्राप्तं वित्तं न प्रशस्यते। अतः अर्थस्य आधारः सदाचारः इति वैदिकमतम्।

वेदाः अर्थोपार्जनस्य नैतिकमर्यादां निर्दिशन्ति। धनस्य उद्देश्यं केवलं स्वार्थसाधनं न, अपितु परिवारस्य, समाजस्य, राष्ट्रस्य च कल्याणम्। अतः दानम्, अतिथिसत्कारः, यज्ञः, शिक्षायाः संवर्धनम्, दरिद्र-जनसेवा च धनस्य श्रेष्ठः विनियोगः कथ्यते।अथर्ववेदे उक्तम्— **"शतहस्त समाहर सहस्रहस्त संकिर।"**[22] अर्थात शतहस्तैः धनं समार्जयेत्, सहस्रहस्तैः तु तस्य वितरणं कुर्यात्। अयं मन्त्रः वैदिकसमाजस्य लोककल्याणप्रधानां आर्थिकदृष्टिं प्रकाशयति।

वेदेषु अर्थस्य सम्बन्धः केवलं व्यक्तिसमृद्ध्या न, अपितु राष्ट्रसमृद्ध्या अपि अस्ति। कृषकाः, गोपालकाः, शिल्पिनः, वणिजः च राष्ट्रस्य आर्थिकबलस्य आधारभूताः इति स्वीकृतम्। अन्नसमृद्धिः, पशुधनवृद्धिः, उद्योगविकासः, व्यापारविस्तारः च राष्ट्रस्य स्थैर्यं समृद्धिं च वर्धयन्ति। वैदिकदर्शनस्य प्रमुखः सिद्धान्तः अस्ति यत् धर्मेण अर्थः साधनीयः। धर्मविरुद्धेन मार्गेण प्राप्तः अर्थः न केवलं व्यक्तेः, अपितु समाजस्य अपि विनाशकारणं भवति। अतः वैदिकाः ऋषयः सत्यं, न्यायं, परिश्रमं, संयमं च आर्थिकजीवनस्य मूलाधा-रत्वेन स्वीकुर्वन्ति।

अतः सम्यक रूपेण अवलोकने ज्ञायते यत् वेदेषु प्रतिपादितः अर्थविचारः आधुनिकस्य नैतिक-अर्थशास्त्रस्य तथा सततविकासस्य मूलतत्त्वैः सह साम्यं वहति। प्राकृतिकसंसाधनानां संरक्षणम्, न्यायपूर्णवितरणम्, श्रमस्य गौरवः, सामाजिकदायित्वम्, लोकमङ्ग-लम् इत्येतानि तत्त्वानि आधुनिकार्थनीतेरपि प्रमुखाधाराः सन्ति। अतः वैदिकार्थदर्शनं केवलं ऐतिहासिकं न, अपितु अद्यतनवै-श्विकसमस्यानां समाधानाय अपि प्रेरणादायकम् अस्ति।

निष्कर्षतः वक्तुं शक्यते यत् वेदेषु अर्थः केवलं धनसञ्चयस्य साधनं न, अपितु धर्माधारितस्य, न्यायपूर्णस्य, लोकहितप्रधानस्य, पर्याव-रणसन्तुलितस्य च जीवनव्यवस्थायाः आधारः अस्ति। वैदिकऋषयः अर्थं पुरुषार्थचतुष्टये महत्त्वपूर्णस्थानं दत्त्वा तस्य नैतिकोपयोगं, सामाजिकदायित्वं, राष्ट्रसमृद्धिं च प्रतिपादितवन्तः। अतः वेदानाम् आर्थिकदर्शनम् अद्यापि मानवसमाजस्य कल्याणाय मार्गदर्शकम् अस्ति।

**उपसंहारः**

वेदाः एव भारतीयानाम् आचारसंहितामूलम। वेदानां तेजस्वी-ज्ञानमेव भारतीयसंस्कृतिः दृढा भवति। अद्यापि च स्थिररूपेण प्रवहति। कालप्रवाहोऽपि वेदज्ञानप्राप्तेः अवरोधाय न समर्थः अस्ति। अद्य सर्वत्र अशान्तेः साम्राज्यमस्ति अभद्रमेव प्रायः श्रृणुमः पश्यामश्च लोकाः कर्म अकृत्वा विश्रान्ति विलासं प्रमोदं च इच्छन्ति तथा च परस्परं विवदमानाः जनाः समाजस्याहितं साधयन्ति। भूमण्डले प्रदूषणर्धने रतोऽस्ति मानवः, राष्ट्रियं लोकस्य च हितं विस्मृत्य वैयक्तिकं स्वार्थम् इच्छन्ति। अतः एतेषां समस्यानां निराकरणार्थ वेदेषु एव विविधाः विचाराः प्रकाटिताः।

अतः वयं सर्वदा श्रवणाभ्यां भद्रमेव श्रृणुयाम्, नेत्राभ्यां च भद्रमेव पश्येम इति। ऋग्वेदे मन्त्रेकस्मिन वणितमस्ति यत् अविद्यायाः निवारणं भवेत्, अन्धविश्वासी, अपराधप्रवृत्तीणां अपाकरणं भवेत् यतः जीवनं सुखमयं भवेत।– **'क्षिपद् अशस्तिम् अप दुर्मतिं हन्नधो करदु यजमानाय शंयोः'**[23] सामाजिक जीवने साफल्यार्थं राष्ट्रस्य समुन्नतेश्च सदैव सत्यं वक्तव्यं धर्मस्य परिपालनं अवश्यमेव करणीयम्। सत्ये न प्रमदितव्यम्, धर्मेऽपि न प्रमदितव्यम् इति।

**सन्दर्भ ग्रन्थाः**


1 एकादशोपनिषदः-मोतीलाल बनारसीदास, वाराणसी-1966.

2 संस्कृतनिबन्धमणिमाला- डॉ. शिवप्रसाद भारद्वाज, सूर्यप्रकाशन नई दिल्ली-1962.

3 ऋग्वेदः — वैदिक संशोधन मण्डलम्, पुणे।-1966

4 यजुर्वेदः (शुक्लयजुर्वेदः/वाजसनेयीसंहिता) — चौखम्बा संस्कृत संस्थान, वाराणसी।-1968

5 अथर्ववेदः — श्रीपाद शर्मा, चौखम्बा संस्कृत सीरीज, वाराणसी।-1968

6 तैत्तिरीयसंहिता — आनन्दाश्रम, पुणे।-1988

7 शतपथब्राह्मणम् — अच्युत ग्रन्थमाला।

8 सत्यकेतु विद्यालङ्कारः — वैदिक संस्कृति का विकास, सरस्वती सदन, नई दिल्ली।

9 वासुदेवशरण अग्रवालः — भारत की मौलिक एकता, भारतीय विद्या भवन।

10 बलदेव उपाध्यायः — वैदिक साहित्य और संस्कृति, चौखम्बा विद्याभवन, वाराणसी।

11 कपिलदेव द्विवेदीः — वेदों का सांस्कृतिक अध्ययन, विश्वविद्यालय प्रकाशन, वाराणसी।


**पाद टिप्पणी**

1. आप. श्रौत- 31
2. मनुस्मृति- 206
3. मनु- 2/ 7
4. महाभाष्य प्रथमाह्निक.
5. मनुस्मृति-1/ 21
6. ऋग्वेद-10/ 191/ 2
7. ऋग्वेद-10/ 191/ 3
8. ऋग्वेद-10/ 191/ 4
9. ऋग्वेद-10/ 34/ 1
10. ऋग्वेद-8/ 19/ 20
11. ऋग्वेद-5/ 9/ 2
12. ऋग्वेद-10/ 164 / 2
13. यजर्वेद-36/ 17
14. यजुर्वेद-614
15. मनुस्मृति-3/ 16
16. अथर्ववेद-7/ 16/ 1
17. अथर्ववेद-20/ 83/3
18. अथर्ववेद-20/ 18/ 3
19. यजु-40/ 14
20. शुक्लयजुर्वेद-36/ 12
21. वाजसनेयिसंहिता-22/ 22
22. अथर्ववेदः 3.24.5
23. ऋग्वेद-10.182.3